- Title – कुमार संभव महाकाव्ये कालिदास कृत
- Accession No – Title – गौरी तप फलोदय – काव्य
- Accession No –
- Folio No/ Pages –
- Lines-
- Size
- Substance Paper –
- Script Devanagari – देवनागरी
- Language – संस्कृत
- Period –
- Beginning – तमिमं कुसदक्षिणोतरं चरणं —
- End – तमेश्वरतिक्षण् भाग्य — —
- Colophon-
- Illustrations -
- Source -
- Subject -
- Revisor -
- Author -

1. Remarks-

पृष्ठ - 10 - से 39 तक है।
महत्व-पूर्ण पृष्ठ नहीं है।

[signature] 23/01/20

न शब्दविज्ञावाः ॥ वसन्ति प्रियकामिनां प्रियास्त्वदृते प्रापयितुं क ईश्वरः ॥११॥ नयनान्यस्मरणानि द्रुःपन्न वचनानि
सबलं पदे पदे ॥ मृ स्त्वयि वासरणी मद्यः प्रमदग्नाम धुना विडंबना ॥१२॥ अवगम्य कथीकृतं वपुः प्रियबंधोस्तव निष्फ
लोदयः ॥ बहुलेपि गते निशाकरस्तनुतां दुःखमनंग मोक्ष्यति ॥१३॥ हरितारुणचारुबंधनः कलपुंस्कोकिलशब्दसूचितः
॥ वद संप्रति कस्य बाणतां नवचूतप्रसवो गमिष्यति ॥१४॥ अलिपंक्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता ॥
विरुतैः करुणस्वनैरियं गुरुशोकामनुरोदितीव मां ॥१५॥ प्रतिपद्य मनोहरं वपुः पुनरप्यादिश तावदुत्थितः ॥ रतिदू
तिपदेषु कोकिलां मधुरालापनिसर्गपंडितां ॥१६॥ शिरसा प्रणिपत्य याचितान्युपगूढानि सवेपथूनि च ॥ सुरतानि च तानि ते
रहः स्मर संस्मृत्य न शांतिरस्ति मे ॥१७॥ रचितं रतिपंडित त्वया स्वयमंगेषु ममेदमार्तवं ॥ ध्रियते कुसुमप्रसाधनं तव तत्

लापनि सर्गः

शिवः
संनिवर्षं परिहर्तुमिछन्नंतर्दधे भूतपतिः सभूतः ॥७४॥ शैलात्मजापि पितुरुच्छिरसोभिलाषं व्यर्थं समर्थ्य ललि
तं वपुरात्मनश्च ॥ सख्योः समक्षमिति चाधिकजातलज्जा शून्या जगाम भवनाभिमुखी कथंचित् ॥७५॥ सपदि
मुकुलिताक्षीं रुद्रसंरंभभीत्या दुहितरमनुकंप्यामद्रिरादाय दोर्भ्यां ॥ सुरगजइव बिभ्रत्पद्मिनीं दंतलग्नां प्रतिप
थगतिरासीद्वेगदीर्घीकृतांगः ॥७६॥ इति श्रीकुमारसंभवे महाकाव्ये कालिदासकृतौ मदनदह
नो नाम तृतीयः सर्गः ॥३॥ अथ मोहपरायणा सती विवशा कामवधूर्विबोधिता ॥ विधिना प्रतिपादयि
ष्यता नववैधव्यमसह्यवेदनं ॥१॥ अवधानपरे चकार सा प्रलयांतोन्मिषिते विलोचने ॥ न विवेद तयोरतृप्तयोः प्रि
यमत्यंतविलुप्तदर्शनं ॥२॥ अयि जीवितनाथ जीवसीत्यभिधायोत्थितया तया पुरः ॥ ददृशे पुरुषाकृति क्षितौ ह

रुरोदानुःपावकोनलः
तृतामरः ३

वसुधोर्वीवक्षंपरादू
स्तमरः ९

रकोपानलभस्मकेवलं ॥ ३ ॥ अथ सा पुनरेव विह्वला वसुधालिंगनधूसरस्तनी ॥ विललाप विकीर्णमूर्धजा समदुः
खामिव कुर्वती स्थलीं ॥ ४ ॥ उपमानमभूद्विलासिनां करणं यत्तव कान्तिमत्तया ॥ तदिदं गतमीदृशीं दशां न विदी
र्ये कठिनाः खलु स्त्रियः ॥ ५ ॥ क्व नु मां त्वदधीनजीवितां विनिकीर्य क्षणभिन्नसौहृदः ॥ नलिनीं क्षतसेतुबंधनो जलसंघा
त इवासि विद्रुतः ॥ ६ ॥ कृतवान् असि विप्रियं न मे प्रतिकूलं न च ते मया कृतं ॥ किमकारणमेव दर्शनं विलपंत्यै रतये न दी
यते ॥ ७ ॥ स्मरसि स्मर मेखलागुणैरुत गोत्रस्खलितेषु बंधनं ॥ च्युतकेसरदूषितेक्षणान्यवतंसोत्पलताडनानि वा
॥ ८ ॥ हृदये वससीति मत्प्रियं यदवोचस्तदवैमि कैतवं ॥ उपचारपदं न चेदिदं त्वमनंगः कथमक्षता रतिः ॥ ९ ॥ परलोकनवप्रवासि
नः प्रतिपत्स्ये पदवीमहं तव ॥ विधिना जन एष वंचितस्त्वदधीनं खलु देहिनां सुखं ॥ १० ॥ रजनीतिमिरावगुंठिते पुरमार्गे घ

कु०स०
९

राम
५

वैर्मेखलाबन्धनकुतूहलं ॥२८॥ ऋषिभिः प्रतिदेहि हृदयीनं स्मरणं दुः उद्धकरणबमापवः ॥ दयितास्वनवस्थितं नृणां न
खलु प्रेमचलं सुहृज्जने ॥२९॥ प्रमुनानुनयाप्रवर्त्तिना जगतां त्रासहरासुरं तव ॥ विशतं नु गुणस्य कारितं धनुषः
कोमलपुष्पपत्रिणः ॥२९॥ गतएवनतेनिवर्त्तते स सखा दीप इवानिलाहतः ॥ अहमस्य दशेव पश्य मामविषह्यव्यसनप्रधूमि
तां ॥३०॥ विधिना कृतमर्धवैशसं ननु मां कामवधे विमुञ्चता ॥ अनपायिनि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी ॥३१॥ तदिदं क्रि
यतामनन्तरं भवता बन्धुजनप्रयोजनं ॥ विधुरां ज्वलनातिसर्जनान्ननु मां प्रापय पत्युरन्तिकं ॥३२॥ शशिना सह याति कौ
मुदी सह मेघेन तडिद्विलीयते ॥ प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि ॥३३॥ अमुनैव कषायितस्तनी सुभगे
न प्रियगात्रभस्मना ॥ नवपल्लवसंस्तरे यथा रचयिष्यामि विभावसौ तनुं ॥३४॥ कुसुमास्तरणे सहायतां बहुशः

तिर चेर
१प्रणो१

सौम्य गतस्त्वमावयोः। कुरु संप्रति तावदाशु मे प्रणिपाताञ्जलियाचितश्चिताम्॥३५॥ तदनुज्वलनं मदर्पितं त्वरये
र्दक्षिणवातवीजनैः। विदितं खलु ते यथा स्मरः क्षणमप्युत्सहते न मां विना॥३६॥ इति चापि विधाय दीयतां सलिलस्यां
जलिरेक एव नौ। अविभज्य परत्र यो मया सहितः पास्यति ते स बान्धवः॥३७॥ परलोकविधौ च माधव स्मरमुद्दिश्य
विलोलपल्लवाः। निवपेः सहकारमञ्जरीः प्रियचूतप्रसवो हि ते सखा॥३८॥ इति देहविमुक्तये स्थितां रतिमा
काशभवा सरस्वती। शफरीं ह्रदशोषविक्लवां प्रथमा वृष्टिरिवान्वकम्पत॥३९॥ कुसुमायुधपत्नि दुर्लु
भस्तव भर्ता न चिराद्भविष्यति। शृणु येन स कर्मणा गतः शलभत्वं हरलोचनार्चिषि॥४०॥ अभिलाषमु
दीरितेन्द्रियः स्वसुतायामकरोत्प्रजा पतिः। अथ तेन निगृह्य विक्रियामभिशप्तः फलमेतदन्वभूत्॥४१॥ परि
जापतिः। कामः

मोहितानुशाप... स्मरः

मुखेनसामनोरथज्ञंपितरंमनस्विनी॥ अयाचतारण्यनिवासमात्मनः फलोदयंतायतपःसमाधये
६ अथानुरूपाभिनिवेशतोषिणा कृताभ्यनुज्ञागुरुणागरीयसा॥ प्रजासुपश्चात्प्रथितंतदाख्ययाजगाम
गौरीशिखरंशिखंडिमत्॥७॥ विमुच्यसाहारमहार्यनिश्चयाविलोलयष्टिप्रविलुप्तचंदनं॥ बबंध
बालारुणबभ्रुवल्कलंपयोधरोत्सेधविशीर्णसंहति॥८॥ यथाप्रसिद्धैर्मधुरैःशिरोरुहैर्जटाभिरप्येव
मभूत्तदाननं॥ नषट्पदश्रेणिभिरेवपंकजंसशैवलासंगमपिप्रकाशते॥९॥ प्रतिक्षणंसाकृतरोम
विक्रियांव्रतायमौंजींत्रिगुणांबभारयां॥ अकारितत्पूर्वनिबद्धयातयासरागमस्यारशनागुणास्
पदं॥१०॥ विसृष्टरागादधरान्निवर्तितःस्तनांगरागारुणिताच्चकंदुकात्॥ कुशांकुरादानपरिक्षतां

गुसूत्रः पार्वत्या

रसा नं

८

कांत्या

गुलिःस्तोतॄस्तत्रप्रसंगपीतयाकरः ॥११॥ महार्हशय्यापरिवर्त्तनच्युतैःस्वकेशपुष्पैरपियास्मदूयते ॥
अशेतसाबाहुलतोपधायिनीनिषेदुषीस्थंडिलएवकेवले ॥१२॥ पुनर्ग्रहीतुंनियमस्थयातयाद्वयेपि
निक्षेपइवार्पितंद्वयं ॥ लतासुतन्वीषुविलासचेष्टितंविलोलदृष्टंहरिणांगनासुच ॥१३॥ अतंद्रितासा
स्वयमेववृक्षकान्घटस्तनप्रस्रवणैर्व्यवर्द्धयत् ॥ गुहोपियेषांप्रथमाप्तजन्मनांनपुत्रवात्सल्यम
पाकरिष्यति ॥१४॥ अरण्यबीजांजलिदानलालितास्तथाचतस्यांहरिणाविशश्वसुः ॥ यथात
दीयैर्नयनैःकुतूहलात्पुरःसखीनाममिमीतलोचने ॥१५॥ कृताभिषेकांहुतजातवेदसंत्वगुत्तरासं
गवतीमधीतिनीं ॥ दिदृक्षवस्तामृषयोभ्युपागमन्नधर्मवृद्धेषुवयःसमीक्ष्यते ॥१६॥ विरोधि

वियुक्तौ मिथुने कृपावती ॥२५॥ मुखेन सा पद्मसुगंधिना निशि प्रवेपमानाधरपत्रशोभिना ॥ तुषारवृष्टिक्षतपद्मसंपदां सरोजसंधानमिवाकरोदपां ॥२७॥ स्वयंविशीर्णद्रुमपर्णवृत्तिता परा हि काष्ठा तपसस्तया पुनः ॥ तदप्यपाकीर्णमतः प्रियंवदां वदंत्यपर्णेति च तां पुराविदः ॥२८॥ मृणालिकाकोमलमेवमादिभिर्व्रतैः स्वमंगं ग्लपयंत्यहर्निशं ॥ तपः शरीरैः कठिनैरुपार्जितं तपस्विनां दूरमधश्चकार सा ॥२९॥ सुरास्तदुद्वीक्ष्य नगेंद्रकन्यकां ततपःसंनुवसत्क्रियावतां ॥ पपाच्चिरेतं प्रणिपत्य दुःखितोः पतीर्घपरनां सुतमाजिहेतवे ॥३०॥ अथाजिनाषाढधरः प्रगल्भवाग् ज्वलन्निव ब्रह्ममयेन वर्चसां ॥ विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा

कुमा २०

॥ ३१ ॥ तमातिथेयी बहुमानपूर्वया सपर्यया प्रत्युदियाय पार्वती ॥ भवन्ति साम्येऽपि निविष्टचेतसां वपुर्विशेषेष्वतिगौरवाः क्रियाः ॥ ३२ ॥ विधिप्रयुक्तां प्रतिगृह्य सत्क्रियां परिश्रमं नाम विनीय च क्षणं ॥ उमां स पश्यन्नृजुनैव चक्षुषा प्रचक्रमे वक्तुमनुज्झितक्रमः ॥ ३३ ॥ अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते ॥ अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनं ॥ ३४ ॥ अपि त्वदावर्जितवारिसंभृतं प्रवालमासामनुबन्धि वीरुधां ॥ चिरोज्झितालक्तकपाटलेन ते तुलां यदारोहति दन्तवाससा ॥ ३५ ॥ अपि प्रसन्नं हरिणेषु ते मनः करस्थदर्भप्रणयापहारिषु ॥ य उत्पलाक्षि प्रचलैर्विलोचनैस्तवाक्षिसादृश्यमिव प्रयुञ्जते

२३

कुशलं

२३

राम

इति प्रसन्ने ३

तांस्मिंवयंभुंजते ॥ ३५ ॥ यद्भुज्यते यान्नेति पापवत्तपेन सूर्यमिंसैव्यनिवारितेद्वचः तर्येहि
तेषां लब्धुदारदर्शनैतयस्विनोर्मयुदेशतांगतां ॥ ३७ ॥ विकीर्णसप्तर्षिबलिप्रवाहिभिस्त
थानगांगैः सलिलैर्दिवश्च्युतैः ॥ यथात्वदीयैश्चरितैरनाविलैर्महीधरः पावितएवहस्ता
न्वयः ॥ ३८ ॥ अनेन च धर्मः सविशेषमद्य मे त्रिवर्गसारः प्रतिभाति भाविनि ॥ त्वयामनोनिर्विष
यार्थकामया यदेकएव प्रतिगृह्य सेव्यते ॥ ३९ ॥ प्रयुक्तसत्कारविशेषमात्मना न मां परं प्रतिपत्तुम
र्हसि ॥ यतः सतां सन्नतगात्रि संगतं मनीषिभिः साप्तपदीनमुच्यते ॥ ४० ॥ अतो त्रवीमि किंचिद्
वेविवहुत्वमां द्विजातिभावादुपपन्नचापलां ॥ अयं जनः प्रष्टुमनास्तपोधने न चेद्र

कुमा॰स॰ २४

अलभ्यं २

हस्यं प्रतिवक्तुमर्हसि ॥४१॥ कुले प्रसूतिः प्रथमस्य वेधसस्त्रिलोकसौंदर्यमिवोदितं वपुः
॥ अमृग्यमैश्वर्यसुखं नवं वयस्तपः फलं स्यात्किमितः परं वद ॥४२॥ भवत्यनिष्टादपि ना-
म दुःसहान्मनस्विनीनां प्रतिपत्तिरीदृशी ॥ विचारमार्गप्रहितेन चेतसा न दृश्यते तच्च कृशो-
दरि त्वयि ॥४३॥ अलभ्यशोकाभिभवेयमाकृतिर्विमानना सुभ्रु कुतः पितुर्गृहे ॥
पराभिमर्शो न तवास्ति कः करं प्रसारयेत्पन्नगरत्नसूचये ॥४४॥ किमित्यपास्याभरणानि यौव-
ने धृतं त्वया वार्द्धकशोभि वल्कलं ॥ वद प्रदोषे स्फुटचंद्रतारका विभावरी यद्यरुणाय कल्प-
ते ॥४५॥ दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः ॥ अथोपयंतारमलं

१२

संभावना यां २

२४
राम

समाधिना न रत्नमन्विष्यति मृग्यते हि तत् ॥४६॥ निवेदितं निःश्वसितेन सोष्मणा मन
स्तु मे संशयमेव गाहते ॥ न दृश्यते प्रार्थयितव्य एव ते भविष्यति प्रार्थितदुर्लभः कथं ॥४७॥ अ
हो स्थिरः कोऽपि तवेप्सितो युवा चिराय कर्णोत्पलशून्यतां गते ॥ उपेक्षते यः श्लथलंबिनीर्जटाः
कपोलदेशे कलमाग्रपिंगलाः ॥४८॥ मुनिव्रतैस्त्वामतिमात्रकर्षितां दिवाकराप्लुष्टविभूष
णास्पदां ॥ शशांकलेखामिव पश्यतो दिवा सचेतसः कस्य मनो न दूयते ॥४९॥ अवैमि सौ
भाग्यमदेन वंचितं तव प्रियं यश्चतुरावलोकिनः ॥ करोति लक्ष्यं चिरमस्य चक्षुषो न वक्त्र
मात्मीयमरालपक्ष्मणः ॥५०॥ कियच्चिरं श्राम्यसि गौरि विद्यते ममापि पूर्वाश्रमसंचि

तं तपः ।। न हृद्धि भागेन ... वरं तमिं धागमिंव साधु वेदितुं ।।५१।। इति प्रविश्याभि
हिता द्विजन्मना मनोगतं सा न शशाक शंसितुं ।। अथो वयस्यां परिपार्श्ववर्त्तिनीं विव
र्त्तिताञ्जननेत्रमैक्षत ।।५२।। सखी तदीया तमुवाच वर्णिनं निबोध साधो तव चेत्कुतूह
लं ।। यदर्थमंभोजमिवोष्णवारणं कृतं तपःसाधनमेतया वपुः ।।५३।। इयं महेन्द्रप्रभृतीन
धिश्रियश्चतुर्दिगीशानवमत्य मानिनी ।। अरूपहार्यं मदनस्य निग्रहात् पिनाक
पाणिं पतिमाप्तुमिच्छती ।।५४।। असह्यहुंकारनिवर्त्तितः पुरा पुरारिमप्राप्तमुखः शिलीमु
खः ।। इमां हृदि व्यायतपातमक्षिणोद्विशीर्णमूर्त्तेरपि पुष्पधन्वनः ।।५५।। तदाप्रभृत्युन्

करिष्यति ॥८०॥ इयं च तेन्या पुरतो विडंबना यदूढया वारणराजहार्यया ॥ विलोक्य वृद्धो
क्षमधिष्ठितं त्वया महाजनः स्मेरमुखो भविष्यति ॥८१॥ द्वयं गतं संप्रति शोचनीयतां
समागमप्रार्थनया कपालिनः ॥ कला च सा कांतिमती कलावतस्त्वमस्य लोकस्य च नेत्र
कौमुदी ॥८२॥ वपुर्विरूपाक्षमलक्ष्यजन्मता दिगंबरत्वेन निवेदितं वसु ॥ वरेषु य
द्बालमृगाक्षि मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने ॥८३॥ निवर्तयास्मादसदी
प्सितान्मनः क्व तद्विधस्त्वं क्व च पुण्यलक्षणा ॥ अपेक्ष्यते साधुजनेन वैदिकी श्मशानशूल
स्य न यूपसत्क्रिया ॥८४॥ इति द्विजातौ प्रतिकूलवादिनि प्रवेपमानाधरलक्ष्यकोपया ॥

पाथार्थमान

विभुं चिताभूतलपांशुलेतत पाविलोचनेति घिगुंपांतलोग्हितं ॥ ७४ ॥ उवाच चैनं पर
मार्थतो हरं न वेत्सि नूनं यत एवमात्थ मां ॥ अलोकसामान्यमचिंत्यहेतुकं द्विषंति
मंदाश्चरितं महात्मनां ॥ ७५ ॥ विपत्प्रतीकारपरेण मंगलं निषेव्यते भूतिसमुत्सुकेन वा ॥
जगच्छरण्यस्य निराशिषः सतः किमेभिराशोपहतात्मवृत्तिभिः ॥ ७६ ॥ अकिंचनः
सन्प्रभवः स संपदां स लोकनाथः पितृसद्मगोचरः ॥ स भीमरूपः शिव इत्युदीर्यते न हि सं
ति याथार्थ्यविदः पिनाकिनः ॥ ७७ ॥ विभूषणोद्भासि पिनद्धभोगि गजाजिनालंबि दु
कूलधारि वा ॥ कपालि वा स्यादथवेंदुशेखरं न विश्वमूर्तेरवधार्यते वपुः ॥ ७८ ॥ तदंग

शिवस्य

ध्रुवं चितामिन पौ समोऽद्वयम २

कुमार २०

२८ तत्

संस्पर्शमवाप्य कल्पते ध्रुवं चिताम स्मरजो विशुद्धये ॥ तथा हि नृत्याभिनयक्रियाच्यु
तं विलुप्यते मौलिभिरंबरौकसां ८० असंपदस्तस्य वृषेण गच्छतः प्रभिन्नदिग्वारण
वाहनो वृषा ॥ करोति पादावुपगम्य मौलिना विनिद्रमंदाररजोरुणांगुली ८१ वि
वक्षता दोषमपि च्युतात्मना त्वयैकमीशं प्रति साधु भाषितं ॥ यमामनंत्यात्मभुवोपि
कारणं कथं स लक्ष्यप्रभवो भविष्यति ८२ ॥ अलं विवादेन यथा श्रुतं त्वया तथावि
धस्तावदशेषमस्तु सः ॥ ममात्र भावैकरसं मनः स्थितं न कामवृत्तिर्वचनीयमीक्षते
॥ ८३ ॥ निवार्यतां मालि किमप्ययं वटुः पुनर्विवक्षुः स्फुरितोत्तराधरः ॥ न केवलं यो

निंदा २

२०

कुमा:

५ प्रसर्गः

॥ राम ॥

॥ २८

महतं विभाषते स्व्रणोति तस्मादपि यः स पापभाक् ॥ ८४ ॥ इतो गमिष्याम्यथवे
ति वादिनी चचाल बाला स्तनभिन्नवल्कला ॥ स्वरूपमास्थाय च तां कृतस्मितः स
मालंबे वृषराजकेतनः ॥ ८५ ॥ तं वीक्ष्य वेपथुमती सरसांगयष्टिर्निक्षेपणाय पदमुद्धृतमु
द्वहंती ॥ मार्गाचलव्यतिकराकुलितेव सिंधुः शैलाधिराजतनया न ययौ न तस्थौ ॥ ८६ ॥
अद्यप्रभृत्यवनतांगि तवास्मि दासः क्रीतस्तपोभिरिति वादिनि चंद्रमौलौ ॥ अह्नाय सा
नियमजं क्लममुत्ससर्ज क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥ ८७ ॥ इति श्री कुमारसंभवे म
हाकाव्ये कालिदासकृतौ गौरीतपःफलोदयो नाम पंचमः सर्गः ॥ अथ विश्वात्मने गौ

कुमार० स० २८

रीसंदिदेशमिथः सखीं ॥ दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति ॥१॥ त
याव्याहृतसंदेशा सा बभौ निभृता प्रिये ॥ चूतयष्टिरिवाभ्याशे मधौ परभृतो
न्मुखी ॥२॥ स तथेति प्रतिज्ञाय विसृज्य कथमप्युमां ॥ ऋषीञ्ज्योतिर्मयान्सप्त
सस्मार स्मरशासनः ॥३॥ ते प्रभामंडलैर्व्योम द्योतयंतस्तपोधनाः ॥ सारुंधतीकाः
सपदि प्रादुरासन्पुरः प्रभो ॥४॥ आप्लुतास्तीरमंदारकुसुमोत्करवीचिषु ॥ आकाशगं
गास्रोतस्सु दिङ्नागमदगंधिषु ॥५॥ मुक्तायज्ञोपवीतानि विभ्रतो हैमवल्कलाः ॥
रत्नाक्षसूत्राः प्रव्रज्यां कल्पवृक्षा इवाश्रिताः ॥६॥ अधःप्रस्थापिताश्वेन समाव

२२

राम

पुरातनाः पुराविद्भिर्दृताः रदनिकीर्त्तिताः २

सहस्रांशु सपनं सवि नरिवि

महावराह दंष्ट्रायां २

जितकेतुना॥ सहस्ररश्मिनां प्राग्वत्सप्रणाममुदीरिता॥७॥ सर्गरोधप्र
यनाद्विशूचोनेरनंतरं॥ महावराहदंष्ट्रायां ग्रासक्तबाहुलतया॥ साद्रिमुद्
तयां भुवीं विश्वं ताः प्रलयापदि॥ पुरातनाः पुराविद्भिर्दृतारदनिकीर्त्तिताः॥८॥
प्राप्तनानां विभूतीनां परिपाकमुपेयुषां॥ नापसांमुपभुंजानाः फलान्यचित
पस्विनः॥९॥ कुलकं॥ तेषां मध्ये गता साध्वी पत्युः पादार्पिते क्षणा॥ सा दृष्टिं वतप
स्सिद्धिं विभासे व दधती॥१०॥ ताममोरवनेदेनमुनीं प्रपश्यदीश्वरः॥ सती व मानि
यनास्यो वाव हिं हि मन्दिरं सतां॥११॥ तदर्शीनादभूच्छंभोर्योदाराथी मादरः क्रिया

सती साध्वी पतिव्रता इत्यमरः ३

कुमार २०

२०

अनूचानः प्रवचने सांगे ऽधीती गुरोस्तु यः इत्यमरः ३

५

ईश्वरः शर्व ईशानः इत्यमरः २

सांप्रतं लब्धजन्मा शनैः सांवत्सरो भव लक्षाधनं ॥१३॥ धर्मेणापि पदं शर्वे कारिते पार्वतीं प्रति ॥ पूर्वापराधभीतस्य कामस्योच्छ्वसितं मनः ॥१४॥ अथ ते मुनयः सर्वे मानयित्वा जगद्गुरुं ॥ इदमूचुरनूचानाः प्रीतिकंटकितत्वचः ॥१५॥ यद्ब्रह्म सम्यगाम्नातं यदग्नौ विधिना हुतं ॥ यच्च तप्तं तपस्तस्य विपक्वं फलमद्य नः ॥१६॥ यदध्यक्षेण जगतां वयमारोपितास्त्वया ॥ मनोरथस्याविषयं मनोविषयमात्मनः ॥१७॥ यस्य चेतसि वर्तेथाः स तावत्कृतिनां वरः ॥ किं पुनर्ब्रह्मयोनेर्यस्तव चेतसि वर्तते ॥१८॥ सत्यमर्काच्च सोमाच्च परमध्यास्महे पदं ॥ अद्य तूच्चैस्तरं तस्मात्स्मरणानुग्रहात्तव ॥१९॥

अग्रो जैवातृकः सोम इत्यमरः २

विकर्तनार्कमार्तण्ड इत्यमरः २

२५

२०

राम

त्वत्संभावितमात्मानं बहु मन्यामहे वयं ॥ प्रायः प्रत्ययमाधत्ते स्वगुणेषूत्तमादरः ॥
२० ॥ या नः प्रीतिर्विरूपाक्ष त्वदनुध्यानसंभवा ॥ सा किमावेद्यते तुभ्यमंतरात्मासि दे
हिनां ॥ २१ ॥ साक्षाद्दृष्टोसि न पुनर्विद्मस्त्वां वयमंजसा ॥ प्रसीद कथयात्मानं न धियां
पथि वर्तसे ॥ २२ ॥ किं येन सृजसि व्यक्तमुत येन बिभर्षि तत् ॥ अथ विश्वस्य संहर्ता भा
गः कतम एष ते ॥ २३ ॥ अथवा सुमहत्येषा प्रार्थना देव तिष्ठतु ॥ चिंतितोपस्थितांस्ताव
च्छाधि नः करवाम किं ॥ २४ ॥ अथ मौलिगतस्येंदोर्विशदैर्दशनांशुभिः ॥ उपचिन्व
न्प्रभां तन्वीं प्रत्याह परमेश्वरः ॥ २५ ॥ विदितं वो यथा स्वार्था न मे काश्चित्प्रवृत्तयः ॥ न

नुगृह्णीमिरवमितिस्थं मन्तोस्मिसच्चित:॥२६॥ सोहं तृष्णातुरैर्वृष्टिं विद्युत्वानिव चातकैः॥
अरिविप्रकृतैर्देवैः प्रसूतिंप्रति याचितः॥२७॥ अतआहर्तुमिच्छामि पार्वतीमात्मजन्मने॥
उत्पत्तयेहविर्भोक्तुर्यजमानइवारणिं॥२८॥ तामस्मदर्थेयुष्माभिर्याचितव्योहिमाल
यः॥ विक्रियायैनकल्पंते संबंधाःसदनुष्ठिताः॥२९॥ उन्नतेनस्थितिमताधुरमुद्वहताभु
वः॥ तेनयोजितसंबंधंवित्तमामप्यवंचितं॥३०॥ एवंवाच्यःसकन्यार्थमितिवोनो
पदिश्यते॥ भवत्प्रणीतमाचारमामनंतिहिसाधवः॥ ३१॥ आर्याप्यरुंधतीतत्रव्यापारं
कर्तुमर्हति॥ महाकोशीप्रपातेस्मिन्संगमःपुनरेवनः॥३२॥ प्रायेणैवंविधेकार्ये

कुमा

पुरंध्रीणां प्रगल्भता॥ तत्प्रयातौषधिप्रस्थं सिद्धये हिमवत्पुरं॥ महाकोशीप्रपाते
ऽस्मिन्संगमः पुनरेव नः॥ तस्मिन्संयमिनामाद्ये जाते परिणयोन्मुखे॥ जहुः परि
ग्रहव्रीडां प्राजापत्यास्तपस्विनः॥३४॥ ततः परममित्युक्त्वा प्रतस्थे मुनिमंडलं
भगवानपि संप्राप्तं प्रथमोद्दिष्टमास्पदं॥३५॥ ते चाकाशमसिश्याममुत्पत्य पर
मर्षयः॥ आसेदुरोषधिप्रस्थं मनसा समरंहसः॥३६॥ अलकामतिवाह्येव वसतिं वसुसं
पदः॥ स्वर्गाभिष्यंदवमनं कृत्वेवोपनिवेशितं॥३७॥ गंगास्रोतःपरिक्षिप्तं वप्रांतर्ज्व
लितौषधि॥ बृहन्मणिशिलासालं स्वर्गादपि मनोरमं॥ ३८॥ जितसिंहभया नागा

मन

27

कुमार०
३२

यत्राश्वा बिलयोनयः ॥ यक्षाः किंपुरुषाः पौरा योषितो वनदेवताः ॥३९॥ शिखरास-
क्तमेघानां व्यज्यंते यत्र वेश्मनां ॥ अनुगर्जितसंदिग्धाः करणैर्मुरजस्वनाः ॥४०॥
यत्र कल्पद्रुमैरेव विलोलविटपांशुकैः ॥ गृहयंत्रपताकाश्रीरपौरादरनिर्मिता ॥४१॥
यत्र स्फटिकहर्म्येषु नक्तमापानभूमिषु ॥ ज्योतिषां प्रतिबिंबानि प्राप्नुवंत्युपहारतां ॥४२॥ य-
त्रौषधिप्रकाशेन यत्र स्फटिकहर्म्येषु ॥ नक्तमापानभूमिन नक्तं दर्शितसंचराः ॥
अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिकाः ॥४३॥ यौवनांतं वयो यस्मिन्नातंकः कुसुमा-
युधात् ॥ रतिखेदसमुत्पन्ना निद्रा संज्ञाविपर्ययः ॥४४॥ भ्रूभंगभिः सकंपोष्ठैर्ललितै-

मिश्रौ

28

राम
३२

दांभसा च वः ॥ ५७ ॥ जंगमं प्रैष्यभावेन स्थावरं चरणांकितं । विभक्तानुग्रहं मन्ये द्विरूपमपि मे
वपुः ॥ ५८ ॥ भवत्संभावनोत्थाय परितोषाय मूर्छते । अपि व्याप्तदिगंतानि नांगानि प्रभवं
ति मे ॥ ५९ ॥ न केवलं दरीसंस्थं भास्वतां दर्शनेन वः । अंतर्गतमपास्तं मे रजसोपि परं तमः ॥
६० ॥ तथापि तावत्कस्मिंश्चिदाज्ञां मे दातुमर्हथ । विनियोगप्रसादा हि किंकराः प्रभविष्णुषु ॥ ६१ ॥ कर्त्तव्यं वो न
पश्यामि स्याच्चेत्किं नोपपद्यते । मन्ये मत्पावनायैव प्रस्थानं भवतामिह ॥ ६२ ॥ एते वयममी दाराः कन्ये
यं कुलजीवितं । ब्रूत येनात्र वः कार्यमनास्था बाह्यवस्तुषु ॥ ६३ ॥ इत्यूचिवांस्तमेवार्थं दरीमुखविसर्पिणा ।
द्विरिव प्रतिशब्देन व्याजहार हिमालयः ॥ ६४ ॥ अथांगिरसमग्रण्यमुदाहरणवस्तु
षु । ऋषयश्चोदयामासुः प्रत्युवाच स भूधरं ॥ ६५ ॥ उपपन्नमिदं सर्वमतः परमपि त्वयि । मनसः शिखराणां च
सदृशी ते समुन्नतिः ॥ ६६ ॥ स्थाने त्वां स्थावरात्मानं विष्णुमाहुस्तथा हि ते । चराचराणां भूतानां कुक्षिराधारतां गतः ॥

६७ ॥ गामधास्यत्कथं नागो मृणालमृदुभिः फणैः ॥ आरसातलमूलात्त्वमवालंबिष्यथा न चेत् ॥ ६८ ॥ अच्छिन्नाम
लसंतानाः समुद्रोर्म्मिनिवारिताः ॥ पुनंति लोकं पुण्यत्वात्कीर्त्तयः सरितश्च ते ॥ ६९ ॥ यथैव श्लाघ्यते गंगा पादेन पर
मेष्ठिनः ॥ प्रभवेन द्वितीयेन तथैवोच्छिरसा त्वया ॥ ७० ॥ तिर्यगूर्ध्वमधस्ताच्च व्यापको महिमा हरेः ॥ त्रिविक्रमोद्य
तस्यासीत्स तु स्वाभाविकस्तव ॥ ७१ ॥ यज्ञभागभुजां मध्ये पदमातस्थुषा त्वया ॥ उच्चैर्हिरण्मयं शृंगं सुमे
रोर्वितथीकृतं ॥ ७२ ॥ काठिन्यं स्थावरे काये भवता सर्वमर्पितं ॥ इदं तु भक्तिनम्रं ते सतामाराधनं वपुः ॥ ७३ ॥ यदा
गमनकार्यं नः शृणु कार्यं न वैव तत् ॥ श्रेयसामुपदेशात्तु वयमत्रांशभागिनः ॥ ७४ ॥ अणिमादिगुणोपेतम
स्पृष्टपुरुषांतरं ॥ शब्दमीश्वर इत्युच्चैः सार्द्धचंद्रं बिभर्त्ति यः ॥ ७५ ॥ कल्पितान्योन्यसामर्थ्यैः पृथिव्यादिभिरात्मनि
येनेदं ध्रियते विश्वं धुर्यैर्यानमिवाध्वनि ॥ ७६ ॥ योगिनो यं विचिन्वंति क्षेत्राभ्यंतरवर्त्तिनं ॥ अनावृत्तिभयं यस्य
पदमाहुर्मनीषिणः ॥ ७७ ॥ स ते दुहितरं साक्षात्साक्षी विश्वस्य कर्मणां ॥ वृणुते वरदः शंभुरस्मत्संक्रामितैः प

भक्तिनम्रं ते

अर्थ इति उभौ द्वियुग्मं प्रधानं तत्र मातानाम्न्या विवाहदीक्षायाः तिलकमानंदाश्रुदृष्टित्वात् कथंचित् क्लेशेन चकार यथानुकिं [illegible] यां [illegible]
[illegible] मांगल्यार्थं हरितालं मनःशिलां चादाय गृहीत्वा उमास्तनोद्भेदमनु पयोधरनिर्गमनेन सह यो [illegible] मनोरथः सो [illegible] प्रदक्षिणमेव [illegible]

३

यां हरितालमार्द्रमांगल्यमादाय मनःशिलां च । कर्णावसक्तामलदंतपत्रं माता तदीयं मुखमुन्नमय्य ॥ २३ ॥ उमा
स्तनोद्भेदमनुप्रवृद्धो मनोरथो यः प्रथमो बभूव । तमेव मेना दुहितुः कथंचिद्विवाहदीक्षातिलकं चकार ॥ २४ ॥ युग्मं
बबंध चास्राकुलदृष्टिरस्याः स्थानांतरे कल्पितसंनिवेशं । धात्र्यंगुलीभिः प्रतिसार्यमाणमूर्णामयं कौतुकह
स्तसूत्रं ॥ २५ ॥ क्षीरोदवेलेव सफेनपुंजा पर्याप्तचंद्रेव शरत्त्रियामा । नवं नवक्षौमनिवासिनी सा भूयो बभौ दर्पण
मादधाना ॥ २६ ॥ तामर्चिताभ्यः कुलदेवताभ्यः कुलप्रतिष्ठां प्रणमय्य माता । अकारयत्कारयितव्यदक्षा क्रमेण पाद
ग्रहणं सतीनां ॥ २७ ॥ अखंडितं प्रेम लभस्व पत्युरित्युच्यते ताभिरुमा स्म नम्रा । तया तु तस्यार्द्धशरीरलाभात्प
श्चात्कृता बंधुजनाशिषोपि ॥ २८ ॥ इच्छाविभूत्योरनुरूपमद्रिस्तस्याः कृती कृत्यमशेषयित्वा । सभ्यः सभायां
सुहृदास्थितायां तस्थौ वृषांकागमनं प्रतीक्षः ॥ २९ ॥ तावद्वरस्यापि कुबेरशैले तत्पूर्वपाणिग्रहणानुरूपं
प्रसाधनं मातृभिरादृताभिर्न्यस्तं पुरस्तात्स्मरशासनस्य ॥ ३० ॥ तद्गौरवान्मंगलमंडनश्रीः सा पस्पृशे केव
लमीश्वरेण । स्व एव वेषः परिणेतुरिष्टं भावांतरं तस्य विभोः प्रपेदे ॥ ३१ ॥ बभूव भस्मैव सितांगरागः कपालमे

बंधनिपत्य [illegible]
[illegible] कर्णे
[illegible]
कौतुकं हस्तसूत्रं
[illegible]
[illegible] मंगलतंतु
[illegible]

31

कुमा० ३६ ३७

वोमलशेखरश्रीः ३१ उपन्तभागेसु च रोचनांको गजाजिनस्यैव दुकूलभावः ३२ शंखान्तरद्योतिविलोचनं यदंतर्नि
विष्टामलपिंगतारं सान्निध्यपक्षेहरितालमय्यास्तदेव जातं तिलकंक्रियायाः ३३ यथाप्रदेशं भुजगेश्वरा
णां करिष्यतामाभरणांतरत्वं शरीरमात्रं विकृतिं प्रपेदे तथैव तस्थुः फणरत्नशोभाः ३४ दिवापि निस्यूत
मरीचिभासा बाल्यादनाविष्कृतलांछनेन चंद्रेण नित्यं प्रतिभिन्नमौलेश्चूडामणेः किंग्रहणं हरस्य ३५
इत्यद्भुतैकप्रभवः प्रभावात्प्रसिद्धनेपथ्यविधेर्विधाता आत्मानमासन्नगणोपनीते खड्गे निषक्त
प्रतिमं ददर्श ३६ सगोपतिं नंदिभुजावलंबी शार्दूलचर्मांतरितोरुपृष्ठं तद्भक्तिसंक्षिप्त बृहत्प्र
माणमारुह्य कैलाशमिव प्रतस्थे ३७ तं मातरो देवमनुव्रजंत्यः स्ववाहनक्षोभचलावतंसाः मुखैः
प्रभामंडलरेणुगौरैः पद्माकरं चक्रुरिवांतरिक्षं ३८ तासां च पश्चात्कनकप्रभाणां काली कपालाभ
रणा चकासे बलाकिनी नीलपयोदराजी दूरं पुरःक्षिप्तशतह्रदेव ३९ ततोगणैः शूलभृतः पुरोगै
रुदीरितो मंगलतूर्यघोषः समेरुशृंगाण्यवगाहमानः शशंस सेवावसरं सुरेभ्यः ४० उपाददे तस्य

32

शिव

सहस्ररश्मिस्स्वयग्धानत्वंनिर्म्मितमातपत्रं सतन्तुकूलादवदूरमौलेर्बभौवहन्नांगमिवप्रवाहं ४१ मूर्त्ते
चगंगायमुनेतदानींसचामरेदेवमसेविषातां समुद्रगारूपविपर्य्ययेपिसहंसपातेइवलक्ष्यमा
णे ४२ तमन्वगच्छत्प्रथमोविधाताश्रीवत्सलक्ष्मा:पुरुषश्चसाक्षात् जयेतिवाचामहिमानमस्य
संवर्द्धयंतौहविषेववह्निं ४३ एकैवमूर्त्तिर्बिभिदेत्रिधासासामान्यमेषांप्रथमावरत्वं विष्णोर्हरेस्तस्यहरिः
कदाचिद्वेधास्तयोस्तावपिधातुराद्यौ ४४ तंलोकपालाःपुरुहूतमुख्याःश्रीलक्षणोत्सर्गविनीतवेषाः
दृष्टिप्रपातेकृतनंदिसंज्ञास्तद्दर्शिताःप्रांजलयःप्रणेमुः ४५ कंपेनमूर्ध्नःशतपत्रयोनिंवाचाहरिंवृत्रह
णंस्मितेन आलोकमात्रेणसुरानशेषान्संभावयामासयथाप्रधानं ४६ तस्मैजयाशीःससृजेपुरस्तात्सप्त
र्षिभिस्तान्स्मितपूर्वमाह विवाहयज्ञेविततेत्रयूयमध्वर्य्यवःपूर्ववृतामयेति ४७ विश्वावसुप्राग्रहरैःप्रवी
णैःसंगीयमानत्रिपुरावदानः अध्वानमध्वांतविकारलंघ्यस्ततारताराधिपखंडधारी ४८ खेखेलगामीत
मुवाहवाहःसशब्दचामीकरकिंकिणीकः तटाभिघातादिवलग्नपंकेधुन्वन्मुहुःप्रोतघनेविषाणे ४९

कुमरसं

33

नार०
३५

संप्रापदप्राप्तपराभियोगंनगेंद्रगुप्तंनगरंमुहूर्तात् पुरोविलग्नैर्हरदृष्टिपातैःसुवर्णसूत्रैरिवकृष्यमा
णः ५० तस्योपकंठेघननीलकंठःकुतूहलादुन्मुखपौरदृष्टः स्वबाणचिह्नादवतीर्य्यमार्गादासन्नभू
पृष्ठमियायदेवः ५१ तमृद्धिमद्बंधुजनाधिरूढैर्वृंदैर्गजानांगिरिचक्रवर्ती प्रत्युज्जगामागमनप्रती
तः प्रफुल्लवृक्षैःकटकैरिवस्वैः ५२ वर्गावुभौदेवमहीधराणांद्वारेपुरस्योद्घटितापिधाने समीयतुर्दू
रविसर्पिघोषौभिन्नैकसेतूपयसामिवौघौ ५३ ह्रीमानभूद्भूमिधरोहरेणत्रैलोक्यवंद्येनकृतप्रणामः
पूर्वंमहिम्नासहितस्यदूरमावर्जितंनात्मशिरोविवेद ५४ सप्रीतियोगाद्विकसन्मुखश्रीर्जामातुरग्रेसरता
मुपेत्य प्रावेशयन्मंदिरमृद्धमेनमागुल्फकीर्णापणमार्गपुष्पं ५५ तस्मिन्मुहूर्त्तेपुरसुंदरीणामीशान
संदर्शनलालसानां प्रासादमालासुबभूवुरित्थंत्यक्तान्यकार्याणिविचेष्टितानि ५६ आलोकमा
र्गंसहसाव्रजंत्याकयाचिदुद्वेष्टनवांतमाल्यः बद्धुंनसंभावितएवतावत्करेणरुद्धोपिहिकेशपा

३५

शिव
३५

प्र. ५७ प्रसाधिकालंबितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव उत्सृष्टलीलागतिराग[...]
पदवीं ततान ५८ विलोचनं दक्षिणमंजनेन संभाव्य तद्वंचितवामनेत्रा तथैव वातायन[...] कर्षं
ययौ शलाकामपरा वहंती ५९ स्तनंधयंतं तनयं विहाय विलोकनाय त्वरया व्रजंती सप्रस्नुता
भ्यां पदवीं स्खलंती। मां हित्वैव काचित्पयसा गवाक्षं ६० जालांतरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न
बबंध नीवीं नाभिप्रविष्टाभरणप्रभेण हस्तेन तस्थाववलंब्य वासः ६१ अर्धाचिता सत्वरमुत्थितायाः प
दे पदे दुर्निमिते गलंती कस्याश्चिदासीद्रशना तदानीमंगुष्ठमूलार्पितसूत्रशेषा ६२ तासां मुखै
रासवगंधगर्भैर्व्याप्तांतराः सांद्रकुतूहलानां विलोलनेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवा
सन् ६३ तावत्पताकाकुलमिंदुमौलिरुत्तोरणं राजपथं प्रपेदे प्रासादशृंगाणि दिवापि कुर्वं
ज्योत्स्नाभिषेकद्विगुणद्युतीनि ६४ तमीश्वरं दृष्टिभिरापिबंत्यो नार्यो न जग्मुर्विषयांतराणि
तथा हि शेषेंद्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा ६५ स्थाने तपो दुश्चरमेतदर्थमपर्णया पे

३५

कुमार० ३६

कौमल्ययापिनिवृत्तं याता स्वयमथ्यस्खलमेननारीहास्यात्कृता पीडिकिमुतोकप्रायां ६६ परस्परे
णस्पृहणीयशोभं नचेदिदं द्वंद्वमयोजयिष्यत् अस्मिन्द्वये रूपविधानयत्नः पत्युः प्रजा
नांवितथोभविष्यत् ६७ ननूनमारूढरुषाशरीरमनेनदग्धंकुसुमायुधस्य ब्रीडादमुंदेवमुदीक्ष्य
मन्येसंन्यस्तदेहः स्वयमेवकामः ६८ अनेनसंबंधमुपेत्यदिष्ट्यामनोरथप्रार्थितमीश्वरेण मू
र्द्धानमालिक्षितिधारणोच्चमुच्चैस्तरांवक्ष्यतिशैलराजः ६९ इत्योषधीविलासिनीनांशृण्वन्कथा
याश्रोत्रसुखाःकुमारः केयूरचूर्णीकृतलाजमुष्टिर्हिमालयस्यालयमाससाद ७० ततोवतीर्याच्यु
तदत्तहस्तःशरद्घनाद्दीधितिमानिवोक्ष्णः क्रान्तानिपूर्वंकमलासनेनकक्षान्तराण्यद्रिपते
र्विवेश ७१ तमन्वगिंद्रप्रमुखाश्चदेवाः सप्तर्षिपूर्वाःपरमर्षयश्च गणाश्चगिरेर्मालिय[illegible]कृत्य
शालमारंभमिवोत्तरार्थं ७२ तत्रेश्वरोविष्टरभाग्यथावत्सरत्नमर्घ्यंमधुमच्चगव्यं नवे[illegible]